"तृतीयेषु पादेष्वादितो यदक्षरं तदनुदात्तीकृत्य ब्रूयात् । एतदुक्तं भवति तृतीयेषु प्रथममादित इत्यर्थः । आदितो ये द्वे अक्षरे तयोः पूर्व्वमनुदात्तं, तस्मात् परं द्वितीयम् उदात्तं यथा भवेत् तथा निनर्देत्, नितरां ब्रूयादित्यर्थः । तदेवमुच्चारणं निनर्दशब्देनोच्यत इत्यर्थः" नारायणवृत्तिः ।

उदराभ्यन्तरस्थिते २अन्त्रभेदे न० । "उदरमेकविंशं विंशतिर्वा अन्तरुदरे कुन्तापान्युदरमेकविंशं तस्मादुदरमेकविंशः" शत०ब्रा० १२।२।४।१२। "अथ यत्कुन्तापमासीत् यो मज्जा स साद्धं समभवत्" तत्रैव १३।४।४।८।

**कुन्ति** पु० भूम्नि कम–झिच् पृषो० । १देशभेदे "कुन्तयोऽवन्तयश्चैव तथैवापरकुन्तयः" भा० भी० ६अ० जनपदोक्तौ तेषां राजा अण् । कौन्त तद्देशनृपे पु० बहुषु तस्य लुक् । कुन्तयः तन्नृपेषु भूम्नि । "सुस्थलाश्च सुकुट्टाश्च कुलिन्दाः कुन्तिभिः सह । साल्वायनाश्च राजानः" भा०स०१२अ० । विदर्भवंशजे क्रथस्य पुत्रे २नृपभेदे "तस्यां विदर्भोऽजनयत् पुत्रौ नाम्ना कुशक्रथौ" इत्युपक्रमे "क्रथस्य कुन्तिः पुत्रोऽभूद्वृष्णिस्तस्याथ निर्वृतिः" भाग०९।२४।२ । "कुन्तेः सख्युः पिता शूरो ह्यपुत्रस्य पृथामदात्" तत्रैव २४अ० १९श्लो० । कार्त्तकौ० सुराष्ट्रेण सहद्व० प्रकृतिस्वरः

**कुन्तिभोज** पु० कुन्तिसंज्ञको भोजः भोजदेशाधिपः । पृथापितरि कुन्तिसंज्ञके भोजराजे नृपभेदे "पृथां दुहितरं वव्रे कुन्तिस्तां कुरुनन्दन ! । शूरः पूज्याय वृद्धाय कुन्तिभोजाय तां ददौ" हरिवं०२५अ० ।

**कुन्तिसुता** स्त्री ६त० । वसुदेवभगिन्यां कुन्तिभोजाय पित्रा शूरेण दत्तकत्वेन दत्तायां पृथायाम् । कुन्तीशब्दे विवृतिः कुन्तितनयादयोऽप्यत्र स्त्री ।

**कुन्ती** स्त्री वसुदेवभगिन्यां कुन्तिभोजदत्तकसुतायां पृथायाम् युधिष्ठिरादिमातरि तत्कथा यथा "महिष्यां जज्ञिरे शूराद्भोज्यायां पुरुषा दश" इत्युपक्रमे वसुदेवाद्युत्पत्तिमुक्त्वा "पञ्च चास्य वराङ्गनाः । पृथुकीर्त्तिः पृथा चैव श्रुतदेवी श्रुतश्रवाः । राजाधिदेवी च तथा पञ्चैता वीरमातरः । पृथां दुहितरं वव्रे कुन्तिस्तां कुरुनन्दन ! । शूरः पूज्याय वृद्धाय कुन्तिभोजाय तां ददौ । तस्मात् कुन्तीति विख्याता कुन्तिभोजात्मजा पृथा" हरिवं०२५ । इत्युक्त्वा "पृथां दुहितरं चक्रे कुन्तिस्तां पाण्डुरावहत्" हरिवं० २५अ० उक्तम् ।

**कुन्तीतनय** पु० ६त० । कुन्त्यां धर्म्मादितो जातेषु २युधिष्ठिरादिषु त्रिषु सूर्य्यात् जाते ४कर्णे च । तत्कथा यथा "यस्यां (कुन्त्याम्) स धर्म्मविद्राजा धर्म्माज्जज्ञे युधिष्ठिरः । भीमसेनस्तथा वातादिन्द्राच्चापि धनञ्जयः" हरिवं० ३५अ० । कर्णोत्पत्तिकथा भा०आ० १११अ० यथा "शूरो नाम यदुश्रेष्ठो वसुदेवपिताऽभवत् । तस्य कन्या पृथा नाम रूपेणाप्रतिमा भुवि । पितृस्वस्रीयाय सुतामनपत्याय भारत ! । अग्र्यमग्रे प्रतिज्ञाय स्वस्यापत्यं स सत्यवाक् । अग्रजामथ तां कन्यां शूरोऽनुग्रहकाङ्क्षिणे । प्रददौ कुन्तिभोजाय सखा सख्ये महात्मने । नियुक्ता सा पितुर्गेहे ब्राह्मणातिथिपूजने । उग्रं पर्य्यचरत्तत्र ब्राह्मणं शंसितव्रतम् । निगूढनिश्चयं धर्म्मे यं तं दुर्व्वाससं विदुः । तमुग्रं शंसितात्मानं सर्व्वयत्नैरतोषयत् । तस्यै स प्रददौ मन्त्रमापद्धर्म्मान्ववेक्षया । अभिचारादिभिर्युक्तमब्रवीच्चैव तां मुनिः । यं यं देवं त्वमेतेन मन्त्रेणावाहयिष्यसि । तस्य तस्य प्रसादेन तव पुत्रो भविष्यति । तथोक्ता सा तु विप्रेण कुन्ती कौतूहलान्विता । कन्या सती देवमर्कमाजुहाव यशस्विनी । सा ददर्श तमायान्तं भास्करं लोकभावनम् । विस्मिता चानवद्याङ्गी दृष्ट्वा तन्महदद्भुतम् । तां समासाद्य देवस्तु विवस्वानिदमब्रवीत् । अयमस्म्यसितापाङ्गि ! ब्रूहि किं करवाणि ते । कुन्त्युवाच । कश्चिन्मे ब्राह्मणः प्रादाद्वरं विद्याञ्च शत्रुहन् ! । तद्विजिज्ञासयाह्वानं कृतवत्यस्मि ते विभो ! । एतस्मिन्नपराधे त्वां शिरसाहं प्रसादये । योषितो हि सदा रक्ष्याः स्वपराधेऽपि नित्यशः । सूर्य्य उवाच । वेदाहं सर्व्वमेवैतत् यद्दुर्व्वासा वरं ददौ । संत्यज्य भयमेवेह क्रियतां सङ्गमो मम । अमोघं दर्शनं मह्यमाहूतश्चास्मि ते शुभे ! । वृथाह्वानेऽपि ते भीरु ! दोषः स्यान्नात्र संशयः । वैशम्पायन उवाच । एवमुक्ता बहुविधं सान्त्वपूर्व्वं विवस्वता । सा तु नैच्छद्वरारोहा कन्याहमिति भारत ! । बन्धुपक्षभयाद्भीता लज्जया च यशस्विनी । तामर्कः पुनरेवेदमब्रवीद्भरतर्षभ ! । मत्प्रसादान्न ते राज्ञि ! भविता दोष इत्युत । एवमुक्त्वा स भगवान् कुन्तिराजसुतां तदा । प्रकाशकर्त्ता तपनः सम्बभूव तया सह । तत्र वीरः समभवत् सर्व्वशस्त्रभृतांवरः । आमुक्तकवचः श्रीमान् देवगर्भः श्रियान्वितः । सहजं कवचं बिभ्रत् कुण्डलोद्द्योतिताननः । अजायत सुतः कर्णः सर्व्वलोकेषु विश्रुतः । प्रादाच्च तस्य कन्यात्वं